श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीकृष्णब्रह्मतन्त्रपरकालयतीन्द्र अनुगृहीता

# ॥ श्री अलङ्करणमालिकास्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री अलङ्करणमालिकास्तुतिः ॥

कमलवनावळिभोग्यं कलशपयोराशिराजसौभाग्यम्।
किमपि हयाननभाग्यं कलयतु मां स्वगुणविनुतिकृतियोग्यम्॥ 1 ॥

हरणायाखिलविपदां करणान्येकादशापि विनियम्य।
श्लोकैरेकादशभिः लोकेशित्रीं स्तुवे प्रसीदतु सा॥ 2 ॥

अंबवधूमणि भवतीम् अम्बुरुहाक्षोऽपि वक्षसि बिभर्ति।
किंबहुनाऽखिलजगतां त्वं बहुमान्या सुधाम्बुनिधिकन्या॥ 3 ॥

निरुपमवरतमसुगुणाङ्कुरनिकुरुंबालवालभूतां त्वाम्।
तुरगवदनस्य तरुणीं तरुणाम्बुजलोचनां श्रये शरणम्॥ 4 ॥

शुभदायकौलवणिम प्रभवौ ननु जननि तव विदितविभवौ।
पादौ वितीर्णमोदौ श्रीदौ स्यातां ममाब्जदायादौ॥ 5 ॥

हरिदर्शनसविकसनं हारि ममामोदिषद्वदोल्लसनम्।
हृदयाम्बुजं शरण्या हयमुखदयितैतुललितलावण्या॥ 6 ॥

शिशिरमयूखावरजं वसितहयग्रीवममृतसागरजम्।
भजतां भवभरतापं नयतां नः किमपि धाम तल्लोकम्॥ 7 ॥

कश्चिद्वणिग्जन इव न्यासधनी मौग्ध्यमम्ब तव वीक्ष्य।
त्वयि विक्रीयाणुतमं स्वमहो लभते महाविभूतिं त्वत्॥ 8 ॥

भुवनावनतिर्निद्रा सवनाशननाथकृतनुतिकृपार्द्रा।
ध्रुवतात्काचिन्मुद्रा भवतापं भव्यदायिनी भद्रा॥ 9 ॥

शकुनि ध्वजाविभाज्यं सकलं तत्किमपि तस्य साम्राज्यम्।
दत्तां विभवं प्राज्यं तत्तादृशमखिलविबुधपरिपूज्यम्॥ **10** ॥

सुचतुरमतिरपि यस्ते नचरणकमलद्वयीं नमेज्जातु।
अचतुष्पात्खर एव स न च विशयोऽत्रास्ति वचननिचयैः॥ **11** ॥

नागवरभोगवाहौ रागवती भगवतीह वागीशे।
द्रागवतात्प्रचुरभवोद्वेगवतोऽस्मान्कृपाझरी काऽपि॥ **12** ॥

भवभरतपर्तुतापा भवन्ति तेऽमी चिरं न साटोपाः।
कमलापाङ्गामानसके किंस्तुघ्नंत्यमून् घनस्मेराः॥ **13** ॥

कल्याणगुणस्यूतां कान्त्याश्लेषेण सन्ततं स्फीताम्।
तनुतां हृद्यां जगतां माताऽलङ्करणमालिकामेताम्॥ **14** ॥

एषा महिशूरेश्वरकृष्णक्ष्मापालरत्नवंशगुरोः।
उदिता कृतिर्विजयतां श्रीकृष्णब्रह्मतन्त्रपरकालात्॥ **15** ॥

॥ श्री अलङ्करणमालिकास्तुतिः समाप्ता॥